Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



यक्ष्मनाशन ऋषिः। चतस्रस्त्रिष्टुभः। एकाऽनुष्टुप्। इन्द्रो वा इन्द्राग्नी वा लिङ्गोक्तदैवतं वा (देवता)। मुञ्चामि त्वा हविषा। इति सूक्तं क्षयरोगनिवृत्त्यर्थं जपेत्। अनेन प्रयोगः — मुञ्चामीत्यादि पञ्चभिः ऋग्भिः आज्यपक्वाद्यैः क्रमेण एकैकऋक्क्रमेण एकैकवारं हुत्वा षडाहुतिसंज्ञं भवति। एवं प्रथमतः कृत्वा, पुनरपि काश्मर्यसमिदाज्यचर्वाज्यद्रव्यक्रमेण एकैक-मन्त्रैरेकैकवारं हुत्वा, तत्र यदि क्षितायुर्यदि वा इत्यृचा होमसमये, तान्येव द्रव्याणि एकैकं शतसंख्यया हुत्वा, पुनरुत्तराभी ऋग्भिरेकैकवारं जुहुयादिति। महाषडाहुतयः आयुष्कराश्च यक्ष्मरोगनाशकराश्च भवन्ति॥

अथाश्लेषां वा पौर्णिमां वा रात्रौ सकलसर्पप्रीत्यर्थं सर्पबलिं करिष्ये इति संकल्प्य तण्डुलचूर्णैरष्टदळानि विरचय्य दळमध्येषु हरिद्राचूर्णानि प्रविकीर्य, पुनः कर्णिकायां च तण्डुलचूर्णानि प्रविकीर्य वामायै नमः। ज्येष्ठायै नमः। रौद्र्यै नमः। काळ्यै नमः। कलविकलिन्यै नमः। बलविकलिन्यै नमः। बलप्रमथिन्यै नमः। सर्वभूतदमन्यै नमः। मनोन्मन्यै नमः॥ ९॥ इत्यष्ट-दळेषु अष्टशक्तीः नवमीं कर्णिकायां च समभ्यर्च्य ओं नमो भगवते सकल-गुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नमः। इति च कर्णिकायाम्। एवं जलगन्धपुष्पधूपदीपैः संपूज्य तत्र पञ्चाक्षरेण शिवं समावाह्य, पञ्चाक्षरे-णैव जलगन्धपुष्पधूपदीपान् दत्वा पुनरष्टदळेषु प्रागादिक्रमेण अनन्ताद्यष्टनागान् समावाहयेत्॥

तत्र प्रथमं प्राग्दळे अनन्तमावाहयामीति आवाह्य, अनन्ताय नमः, इति जलगन्धपुष्पधूपदीपैः संपूज्य आग्नेयदळे वासुकिमावाहयामीत्यावाह्य, वासुकये नमः इति जलगन्धपुष्पधूपैस्त्रिवारं संपूज्य, पुनर्दक्षिणदळे तक्षकमावाहयामीति तक्षकाय नमः इति पूर्ववत् संपूज्य निर्ऋतिदळे कार्कोटकमावाहयामीति कार्कोटकाय नमः इति संपूज्य वारुणदळे शङ्खपालमावाहयामि शङ्खपालाय नमः इति जलादिभिस्संपूज्य वायव्यदळे गुळिकमावाहयामि गुळिकाय नमः इति पूर्ववत्संपूज्य, उत्तरदळे पद्ममावाहयामि पद्माय नमः इति संपूज्य ईशानदळे महापद्ममावाहयामि इत्यावाह्य महापद्माय नमः इति जलादिभिस्संपूज्य पुनरष्टदळाद्बहिः प्रागादिक्रमेण देवग्रहेभ्यो नमः। मनुष्यग्रहेभ्यो नमः। गन्धर्वग्रहेभ्यो नमः। यक्षग्रहेभ्यो नमः। पितृग्रहेभ्यो नमः। नागग्रहेभ्यो नमः। पिशाचग्रहेभ्यो नमः। राक्षसग्रहेभ्यो नमः॥ इत्यष्टदिक्षु जलगन्धपुष्पैः संपूज्य, क्षं क्षेत्रपालाय नमः इत्युत्तरभागे समभ्यर्च्य पुनः

कर्णिकामध्यस्थित महादेवायान्नं निवेद्य अष्टदळस्थितानन्ताद्यष्टनागानां तण्डुलचूर्णलोळितक्षीरं कदळीफलसहितं निवेद्य अनन्तादिसर्वनागानां यथाभागं निवेद्यमिदं समर्पयामीति निवेद्य गण्डूषादिकं दत्वा कर्णिकामध्यस्थितमहादेवमारभ्य अनन्ताद्यष्टनागक्रमेण देवग्रहादीनां चान्नेनैव तत्तत्स्थानेषु बलिं हरेत्। ओं नमः शिवाय स्वाहा। अनन्ताय स्वाहा। इत्यादिक्रमेण देवग्रहेभ्यः स्वाहा। मनुष्यग्रहेभ्यः स्वाहा इत्यादिप्रकारेण स्वाहान्तैर्मन्त्रैः बलिं हरेत्।